हिमसंहतिः, स्त्री, ( हिमानां संहतिः । ) हिमसमूहः । बरफ् इति पारस्यभाषा । तत्पर्य्यायः । हिमानी २ । इत्यमरः । १ । ३ । १८ ॥ महद्धिमम् ३ । इति जटाधरः ॥

हिमहासकः, पुं, (हिममपि हसति शीतलत्वात् । हस+ण्वुल् । हिन्तालवृक्षः । इति शब्दरत्नावली ॥

हिमा, स्त्री, ( हिम+अर्श आद्यच् । टाप् । ) सूक्ष्मैला । रेणुका । भद्रमुस्ता । नागरमुस्ता । पृक्का । चणिका । इति राजनिर्घण्टः ॥

हिमांशुः, पुं, ( हिमा अंशवो यस्य । ) चन्द्रः । इत्यमरः । १ । ३ । १३ ॥ (यथा, रघुः ।५।१६।
"पर्य्यायपीतस्य सुरैर्हिमांशोः
कलाक्षयः श्लाघ्यतरो हि वृद्धेः ॥")
कर्पूरः । इति राजनिर्घण्टः ॥

हिमांश्वभिख्यं, क्ली, ( हिमांशोरिव अभिख्या शोभा यस्य । ) रौप्यम् । इति हेमचन्द्रः ॥

हिमागमः, पुं, ( हिमस्य आगमो यत्र । ) हेमन्तः । इति राजनिर्घण्टः ॥ (यथा, महाभारते । ५ । ८३ । ७ ।
"कौमुदे मासि रेवत्यां शरदन्ते हिमागमे ।
स्फीतसस्यसुखे काले कल्यः सत्त्ववतां वरः ॥")

हिमाद्रिः, पुं, ( हिमप्रधानोऽद्रिः । ) हिमालयपर्व्वतः । इति भूरिप्रयोगः ॥ (यथा, रघुः । ४ । ७९ ।
"परस्परेण विज्ञातस्तेषूपायनपाणिषु ।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ॥")

हिमाद्रिजा, स्त्री, (हिमाद्रौ जायते इति । जन+डः । ) क्षीरिणी । इति राजनिर्घण्टः ॥ पार्व्वती च ॥ (यथा, वक्रोक्तिपञ्चाशिकायाम् । १ ।
"मैवं वच्मि किं वनं ननु जलं मूर्द्धा मयैवोह्यते
वक्रोक्त्येति हिमाद्रिजामवचसं कुर्व्वन् हरः पातु वः ॥")

हिमाद्रितनया, स्त्री, ( हिमाद्रेस्तनया । ) दुर्गा । इति वक्ष्यमाणशब्ददर्शनात् ॥

हिमाद्रितनयापतिः, स्त्री, ( हिमाद्रितनयाया दुर्गायाः पतिः ) शिवः । इति कविकल्पलता ॥

हिमानी, स्त्री, ( महद्धिममिति । "हिमारण्ययोर्महत्त्वे ।" ४ । १ । ४९ । इत्यस्य वार्त्तिकोक्त्या ङीष् आनुक् च । ) हिमसंहतिः । इत्यमरः । १ ।३।१८॥ (यथा, राजतरङ्गिण्याम् । १ ।१८० ।
"हिमान्यां बौद्धबाधाय पतन्त्यां प्रतिवत्सरम् ।
शीते दार्व्वाभिसारादौ षण्मासान् पार्थिवोऽवसत् ॥")
यावनालशर्करा । इति राजनिर्घण्टः ॥

हिमाब्जं, क्ली, ( हिमे हेमन्ते जातं अब्जम् । ) उत्पलम् । इति राजनिर्घण्टः ॥

हिमारातिः, पुं, ( हिमस्य अरातिः । ) अग्निः । सूर्य्यः । इति मेदिनी ॥ चित्रकवृक्षः । अर्कवृक्षः । इत्यमरे वह्निसंज्ञककार्क्कशब्दयोर्दर्शनात् ॥

हिमालयः, पुं, (हिमस्य आलय इव शुक्लत्वात् ।) शुक्लखदिरः । इति शब्दचन्द्रिका ॥ ( हिमानामालयः ।) स्वनामख्यातपर्व्वतः । तत्पर्य्यायः । नगपतिः २ मेनाधवः ३ उमागुरुः ४ । इति त्रिकाण्डशेषः ॥ हिमाद्रिः ५ नगाधिपः ६ । इति जटाधरः ॥ उदगद्रिः ७ अद्रिराट् ८ मेनकाप्राणेशः ९ हिमवान् १० हिमप्रस्थः ११ भवानीगुरुः १२ । इति हेमचन्द्रः ॥ ( यथा, कुमारे । १ । १ ।
"अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ।
पूर्व्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः ॥")
स तु लङ्काया उत्तरे वर्त्तते । भारतवर्षस्य सीमापर्व्वतोऽयम् । अस्य दैर्घ्यं दशसहस्रयोजनानि । प्रस्थे द्विसहस्रयोजनानि । यथा,—
"एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः । अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम् ।" इति श्रीभागवते ५ स्कन्धे १६ अः ॥

हिमालयसुता, स्त्री, ( हिमालयस्य सुता । ) उमा । इति कविकल्पलता ॥

हिमालया, स्त्री, ( हिमस्य शीतस्य आलयो यत्र । ) भूम्यामलकी । इति राजनिर्घण्टः ॥

हिमावती, स्त्री स्वर्णक्षीरी । इत्यमरः । २ । ४ । १२८ ॥ ( पर्य्यायो यथा,—
"कटुपर्णी हैमवती हेमक्षीरी हिमावती ।
हेमाह्वा पीतदुग्धा च तन्मूलं चोकमुच्यते ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

हिमाह्वः, पुं, ( हिममपि आह्वयते स्पर्द्धते वर्णेनेति । ह्वे+कः । ) कर्पूरः । इति केचित् ॥ (वर्षविशेषः । यथा, मार्कण्डेये । ५३ । ४० ।
"हिमाह्वं दक्षिणं वर्षं तस्य नाम्ना महात्मनः ॥")

हिमाह्वयः, पुं, ( हिममाह्वयते स्पर्द्धते वर्णेनेति । आ+ह्वे+अच् । हिमस्य आह्वा आह्वा यस्येति वा । ) कर्पूरः । इति त्रिकाण्डशेषः ॥ ( वर्षविशेषः । यथा, मार्कण्डेये । ५३ । ३६ ।
"यानि किंपुरुषाद्यानि वर्ज्जयित्वा हिमाह्वयम् ।
तेषां स्वभावतः सिद्धिः सुखप्राया ह्ययत्नतः ॥")

हिमाश्रया, स्त्री, ( हिमस्य शीतलस्य आश्रयो यस्याः । ) स्वर्णजीवन्ती । इति राजनिर्घण्टः ॥

हिमिका, स्त्री, तृणोपरि पतितहिमम् । इति केचित् ॥

हिमेलुः, त्रि, ( हिमं न सहते इति । हिम+ "तत्र सहते इति हिमाचेलुः ।" ५ । २ । १२२ । इत्यस्य वार्त्तिकोक्त्या इलुः । ) हिमक्लेशितः । हिमार्त्तः । इति केचित् ॥

हिमोत्तरा, स्त्री, ( हिमः उत्तरो यस्याः । ) कपिलद्राक्षा । इति राजनिर्घण्टः ॥

हिमोत्पन्ना, स्त्री, ( हिमे हिमप्रधाने उत्पन्ना । ) यावनाली । इति राजनिर्घण्टः ॥

हिमोद्भवा, स्त्री, ( हिमे हेमन्ते उद्भवो यस्याः । ) शटी । इति राजनिर्घण्टः ॥

हिम्यः, त्रि, हिमभवः । हिमशब्दात् यत्प्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुदी । ५।१।१२० ॥

हिरङ्कुः, पुं, राहुः । इति केचित् ॥

हिरणं, क्ली, रेतः । स्वर्णम् । वराटकः । इति मेदिनी ॥

हिरण्मयं क्ली, (हिरण्यस्य विकारः । हिरण्य+मयट् । "दाण्डिनायनहास्तिनायनेति ।"६।४। १७४ । इति निपातितः । ) भारतवर्षादिनववर्षान्तर्गतवर्षविशेषः । इति त्रिकाण्डशेषः ॥ तद्विवरणं यथा । उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवान् इति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रयोजनपृथव एकैकशः पूर्व्वस्मात् पूर्व्वस्मादुत्तरोत्तरो दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति । इति श्रीभागवते ५ स्कन्धे १६ अध्यायः ॥

हिरण्मयः, पुं, ( हिरण्य+मयट् । ) ब्रह्मा । सुवर्णमये, त्रि । इति मेदिनी ॥ (यथा, भट्टिः । २ । ४७ ।
"हिरण्मयी शाललतेव जङ्गमा
च्युता दिवः स्थास्नुरिवाचिरप्रभा ॥" )

हिरण्यं, क्ली, ( हर्य्यति दीप्यते इति । हर्य्य गतिकान्त्योः + "हर्य्यतेः कन्यन् हिर च ।" उणा० ५ । ४४ । इति कन्यन् । हिरादेशश्च धातोः ।) सुवर्णम् । ( यथा, मनुः । २ । २४६ ।
"क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमासनम् ।
धान्यं शाकञ्च वासांसि गुरवे प्रीतिमावहेत् ॥")
तद्वैदिकपर्य्यायाः । हेम १ चन्द्रम् २ रुक्मम् ३ अयः ४ हिरण्यम् ५ पेशः ६ कृशनम् ७ लोहम् ८ कनकम् ९ काञ्चनम् १० भर्म्म ११ अमृतम् १२ मरुत् १३ दत्रम् १४ जातरूपम् १५ । इति पञ्चदश हिरण्यनामानि । इति वेदनिर्घण्टौ १ अध्यायः ॥ धुस्तूरम् । इत्यमरः । २ । ९ । ९४ ॥ रेतः । द्रव्यम् । वराटः । अक्षयम् । मानभेदः । अकुप्यम् । इति मेदिनी ॥ रजतम् । धनम् । इति शब्दरत्नावली ॥ ( पुं, गुग्गुलुविशेषः । तत्प्रकारो यथा,—
"महिषाक्षो महानीलः कुमुदः पद्म इत्यपि ।
हिरण्यः पञ्चमो ज्ञेयो गुग्गुलोः पञ्च जातयः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

हिरण्यकशिपुः, पुं, दैत्यविशेषः । स तु कश्यपस्य दित्यां पत्न्यां जातः । तस्य सहोदरः हिरण्याक्षः । तस्य भार्य्या कयाधुः । तस्य पुत्राः संह्लादः १ अनुह्लादः २ ह्लादः ३ प्रह्लादः ४ । कन्या सिंहिका । इति श्रीभागवतम् ॥ अपि च ।
"त्वया यौ निहतौ देव ! दानवौ मधुकैटभौ ।
अवतीर्णौ पुनर्दैत्यौ भूत्वा कश्यपनन्दनौ ।
हिरण्यकशिपुश्चैव हिरण्याक्षो महासुरः ॥"